संस्कृत-वार्ता:

दिनाङ्क: 15.01.2026 प्रात: - 06:55

## अथ वार्ताः

### पीएम सीएसपीओसी

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् अष्टाविंशतितमस्य 'कॉन्फ्रेन्स ऑफ स्पीकर्स एण्ड प्रेसाइडिंग ऑफिसर्स ऑफ द कॉमनवेल्थ' इत्येतस्य सम्मेलनस्य उद्घाटनं कुर्यात्। लोकसभाध्यक्षः ओम् बिरला इत्येषः अस्य सम्मेलनस्य अध्यक्षतां कुर्यात्। द्विचत्वारिंशत् - देशानाम् आहत्य एकषष्ठि- वक्तारः पीठासीनाधिकारिणः च अस्मिन् सम्मेलने भागं ग्रहीष्यन्ति। सशक्त- लोकतान्त्रिक- संस्थानां रक्षणार्थम् अध्यक्षानां पीठासीनाधिकारिणां च भूमिकां समेत्य समकालीन - संसदीय – विषयाणाम् एकस्मिन् भूमिकां समेत्य विस्तृत- शृङ्खलायां विस्तारेण चर्चा भविष्यति। तत्रैव संसदीयकार्ये आर्टीफीशियल इंटेलीजैंस इत्येतस्य उपयोगः, सांसदानां उपरि समाजिकसञ्चार- पटलानां प्रभावः, संसदः विषये समान्यजनानाम् अवबोधं वर्धयितुं नूतनकार्यनीतिः चेत्येतेषु विषयेषु चर्चा भविष्यति।

### पीएम- पोङ्गल

प्रधानमन्त्री नरेन्द्रमोदी बलं प्रदत्तवान् यत् पोङ्गल् सदृशः सस्योत्पादनोत्सवः एकभारत-श्रेष्ठ-भारत इत्येतस्य भावनां सुदृढां करोति। श्रीमोदी ह्यः नवदिल्ल्यां केन्द्रीयसूचनाप्रसारण- राज्यमन्त्री डॉ. एल्. मुरुगन इत्येतस्य आवासे आयोजिते पोङ्गल् पर्वणः समारोहे वक्तव्यमिदं प्रदत्तवान्। प्रधानमन्त्री अकथयत् यत् पोङ्गलपर्व तमिलसंस्कृतेः प्रकृत्या सह च तस्य बन्धनस्य उत्सवः अस्ति। असौ कथितवान् यत् इदं पर्व प्रकृत्या परिवारेण समाजेन च सह संतुलनस्थापनस्य मार्गं प्रशस्तीकरोति।

### तमिल- पोङ्गल्

सम्पूर्णेऽपि विश्वे तमिलभाषिणां जनैः पोङ्गल् इति सस्योत्सवः आचर्यते। तमिल- पञ्चाङ्गे वसन्तस्य आरम्भः अपि एषः एव अस्ति। थाई-मासः तमिलसमाजे जीवनस्य सर्वेषु क्षेत्रेषु नवारम्भः आनयति। विवाहार्थं, नवोद्यमार्थं च एतत् पर्व शुभं मन्यते। अस्मिन् दिवसे सस्योत्पादनानन्तरं फलानि सूर्याय समर्प्यन्ते, येन कृषिकार्ये साहाय्यं भवति।

### राष्ट्रपतिः

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्यारभ्य पञ्जाबराजस्थानयोः द्विदिवसीययात्रायां भवेत्। अद्य अमृतसरे गुरुनानकदेव - विश्वविद्यालयस्य पञ्चाशत् - वार्षिके दीक्षान्तसमारोहे सम्मिलिता भवेत्। श्वः राष्ट्रपतिः जालन्धर- नगरे डॉ. बी.आर् अम्बेडकरराष्ट्रीय -प्रौद्योगिकीसंस्थानस्य एकविंशतितमे दीक्षान्तसमारोहे भागं ग्रहीष्यति। तस्मिन एव दिने एषा जयपुरे रामानन्द मिशन इत्येतेन आयोजिते अष्टाधिकैकसहस्र- कुण्डीय- हनुमान- महायज्ञे अपि सम्मिलिता भविष्यति।

### क्रिकेट

पुरुषक्रिकेट् - क्रीडायां, न्यूजीलैण्डदलेन ह्यः रात्रौ राजकोटनगरे निरञ्जनशाह- प्राङ्गणे क्रीड्यमाने एकदिवसीयक्रिकेट्- शृङ्खलायाः द्वितीये द्वन्द्वे भारतं सप्तस्तोभैः पराजितम्।

।।इति वार्ता:।।